# Shri Vijayanarasimha Stuti

# શ્રીવિજયનારસિંહસ્તુતિઃ

## Document Information

Text title : Shri Vijayanarasimha Stuti

File name : vijayanArasiMhastutiH.itx

Category : vishhnu, dashAvatAra, stuti, viShNu

Location : doc_vishhnu

Author : araiyara shrIrAmasharmaNA bAlya

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીવિજયનારસિંહસ્તુતિઃ

ભજદભયઙ્કર ભીમપરાક્રમ વીરનૃસિંહવિભો ।
ખરનખરાયુધ પાહિ પરાત્પર ઘોરતરાઘહર ॥ ૧॥

વિષ્ફુરિતાલકકેસરભાસુર દીપ્તલલાટતટ ।
ફાલવિલોલ વિશઙ્કુટ વિષ્ફુરદગ્નિ વિલોચન ! ભો ॥ ૨॥

ભ્રુકુટિભયઙ્કર ! તરલિતતારક કેકરનેત્ર જય ।
ઉદ્ધત નિશ્ચલ કર્ણવિલમ્બિત ચન્દ્રરવિદ્વય કર્ણિક ભો ॥ ૩॥

વિધુતસટારુણ પટલતટસ્ફુટ ઋક્ષસહસ્ર જય ।
અતિશિતપાયિત વજશતાયિત ભીકરદંષ્ટ્ર જય ॥ ૪॥

વિસ્ફુરદગ્ર મુખોદરનિર્ગલદુગ્ર ફણિદ્યુતિજિહ્વ જય ।
વ્યાયત ઘોર ગુહામુખનિર્ગત ઘનગુરુગર્જિત વિજય જય ॥ ૫॥

તુઙ્ગભુજદ્વય દણ્ડવિજૃમ્ભિત શઙ્ખરથાઙ્ગકર ।
અંસવિજૃમ્ભણ સમ્ભ્રમજૃમ્ભિત પીવરવત્સ વિભો ॥ ૬॥

શુભ્ર પરિસ્ફુરદુગ્રભુજઙ્ગમ ભઙ્ગ્યુપવીત વિભો ।
મુષ્ટિમિતિક્રમ પીતપટોત્કટ મગ્નવલગ્ન વિભો ॥ ૭॥

અષ્ટમહાભુજ યષ્ટિવિજૃમ્ભણ કૂણિતદૃક્ કરિકૂટ વિભો ।
વાલવિધૂનન વેગવિકમ્પિત સપ્તસમીરણ ચક્ર વિભો ॥ ૮॥

પીનતર પ્રવરોરુ સમુદ્ધતિડોલિત વિશ્વકટાહ વિભો ।
કચ્છપકર્કશ જાનુવિઘટ્ટન ભુગ્નકુલાચલચક્ર વિભો ॥ ૯॥

સ્તમ્ભ વિજૃમ્ભણ ભાવભયઙ્કર વિક્રમણક્રમ જઙ્ઘ વિભો ।
યુદ્ધસમુદ્ધત દાનવમર્દન સજ્જપદદ્વયં જયજય ભો ॥ ૧૦॥

જયજય વિશ્વસુમઙ્ગલ પિઙ્ગલવર્ણ વિનિર્જિત નૈશકલ ।
બ્રહ્મક્ષત્રવિબોધ દિવાકર યાદવશૈલ નૃસિંહ જય ॥ ૧૧॥

ઘોરતરં તવરૂપમિદં ગુરુદેવ રિપુવ્રજ ભીતિકરમ્ ।
દુર્જન ગર્જન તર્જન નિશ્ચલ સાધુજન વ્રજભીતિહરમ્ ॥ ૧૨॥

જયતુ જયોદય સમ્ભ્રમ સમ્ભૃત જય લક્ષ્મીકર સઙ્કુલિતમ્ ।
રૂપમિદં તવ દેવ મહત્તરમુત્તમ વીરદયાદયિતમ્ ॥ ૧૩॥

જય જય વિશ્વવિધારણ કારણ સત્વસમુદ્ધર ધર્મવિભો ।
જયજય સત્વર વૈરિવિજિત્વર વીરનૃસિંહ વિભો ॥ ૧૪॥

દુષ્ટ ભયઙ્કર ભક્તદયાકર ચક્રગદાકર શઙ્કર ભો ।
જય જય જય જય દેવ જનાર્દન જય નુતિરિયમપિ જયતિતરામ્ ॥ ૧૫॥

ઇતિ અરૈયર શ્રીરામશર્મણા બાલ્ય એવ વિરચિતા શ્રીવિજયનારસિંહસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by M K Barman

*Shri Vijayanarasimha Stuti*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*